ॐ

कलशपूजोपयोगि

ऋचकम्

अत्र संस्कर्ता गणेशघाट्टवास्तव्यः कल्लेत्युपाह्वः

पण्डित नाथराम शास्त्री

मुद्रापकः

पण्डित काशीनाथ चरागी महावीर बाज़ार

हबा कदल श्रीनगर

शाकाब्दः १८६१ संवत् १९९६

मूल्यम् आना २/=


Durga Press, Srinagar

CC-0. Late Pt. Nathram Shastri Collection Jammu. Digitized by eGangotri

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

ॐ

श्रीगणेशायनमः ॥



ॐकारो यस्य मूलं क्रमपदजठरं छन्दविस्तीर्णशाखा ऋक्पत्रं सामपुष्पं यजुरुचितफलं स्यादथर्वा प्रतिष्ठा । यज्ञश्छाया सुश्वेतै-र्द्विजगणमधुपैर्गीयते यस्य नित्यं शक्तिः सन्ध्या त्रिकालं दुरित-भयहरः पातु नो वेदवृक्षः ॥

सच्छायः स्थिरधर्ममूलवलयः पुण्यालवालान्वितो धीविद्या-करुणाक्षमादिविलसद्विस्तीर्णशाखाश्रितः । सन्तोषोज्ज्वलपल्लवः शुचियशःपुष्पः सदा सत्फलः सर्वाशापरिपूरको विजयते श्रीवे-दकल्पद्रुमः ॥

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

मूलाधाराद्भुतवहकलामिश्रितं भूर्भुवःस्वर्ब्रह्मस्थानात्परमग-
हनात्तःसवितुर्वरेण्यम् । भर्गो देवः शशिकलमयी धीमहीत्येकरूपं
धियो यो नः पिव तदमृतं चोदयान्नः परंतत् ॥

मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्यु-
क्तामिन्दुनिबद्धरत्नमुकुटां तत्त्वात्मवर्णात्मिकाम् ।
गायत्रीं वरदाभयांकुशकरां शूलं कपालं गुणं
शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे ॥
आयातु वरदा देवी अक्षरा ब्रह्मवादिनी ।
गायत्रि च्छन्दसां मातर्ब्रह्मयोने नमोस्तु ते ॥

॥ ऋचकम् ॥

ओजोऽसीति गायत्रीमावाह्य
देवानामार्षम् ॥

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

ओजोऽसि सहोऽसि बलमसि भ्राजोऽसि देवानां धाम नामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूः ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॐ ॥

स्वस्त्यात्रेयः (विश्वेदेवाः) पांक्त्यन्तमग्नेः पञ्चोनाश्चतस्रो गायत्र्यः षडुष्णिहश्चतस्रस्त्रिष्टुभोऽनुष्टुभौ बृहती च ॥

स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः । स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतना ॥ स्वस्तये वायुमुपब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः । बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवन्तु नः ॥ विश्वे देवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये । देवा अवन्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः ॥ स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति । स्वस्ति न इन्द्रश्चाग्निश्च स्वस्ति नो अदिते कृधि ॥ स्वस्ति पन्थामनुचरेम सूर्याचन्द्रमसाविव । पुन-

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

ददता घ्नता जानता सङ्गमेमहि ॥ स्वस्त्ययनं तार्क्ष्यमरिष्टनेमिं महद्भूतं वायसं देवतानाम् ॥ असुरघ्नमिन्द्रसखं समत्सु बृहद्यशो नावमिवारुहेम ॥ अंहोमुचमाङ्गिरसं गयं च स्वस्त्यात्रेयं मनसा च तार्क्ष्यम् । प्रयतपाणिः शरणं प्रपद्ये स्वस्ति सम्बाधेष्वभयं नो अस्तु (कल्याणमस्तु) ॥

कनिक्रदत्तृचं प्रदक्षिणिज्जागतं मध्येऽतिशक्वर्यपिर्वेताभ्यामृषिरध्वनि वाशमानं शकुन्तं तुष्टाव कुशिकस्त्वैषीरथिरिन्द्रतुल्यं पुत्रमिच्छंस्तपस्तेपे तस्येन्द्र इव गाधीपुत्रो जज्ञे गाधिनो विश्वामित्रः स तृतीयं मण्डलमपश्यत् ॥

(कनिक्रददिति तृचं सूक्तं गृत्समदः शकुन्त इन्द्रस्त्रिष्टुप्) ॥

कतिक्रदज्जनुषं प्रब्रुवाण इयर्ति वाचमरितेव नावम् । सुमङ्गलश्च शकुने भवासि मा त्वा कचिदभिभा विश्व्या विदत् ॥ मा त्वा श्येन उद्वधीन्मा सुपर्णो मा त्वा विददिषुमान्वीरो अस्ता । पित्र्यामनु प्रदिशं कनिक्रदत्सुमङ्गलो भद्रवादी वदेह ॥

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

अव क्रन्दन्दक्षिणतो गृहाणां सुमङ्गलो भद्रवादी शकुन्ते ।
मा नः स्तेन ईशत माघशंसो बृहद्वदेम विदथे सुवीराः ॥
(प्रदक्षिणिदिति तृचं सूक्तं गृत्समदः शकुन्तो जगती द्वितीयातिशक्वर्यष्टिर्वा)

प्रदक्षिणिदभिगृणन्ति कारवो वयो वदन्त ऋतुथा शकुन्तयः । उभे वाचौ वदति सामगा इव गायत्रं च त्रैष्टुभं चानु राजति ॥ उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शँससि । वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने । भद्रमा वद विश्वतो नः शकुने पुण्यमा वद ॥ भद्रं वद दक्षिणतो भद्रमुत्तरतो वद । भद्रं पुरस्तान्नो वद भद्रं पश्चात्कपिञ्जल ॥ भद्रं वद पुत्रैर्भद्रं वद गृहेषु च । भद्रमस्माकं वद भद्रं नो अभयं वद ॥ भद्रमधस्तान्नो वद भद्रमुपरिष्टान्नो वद । भद्रं भद्रन्न आवद भद्रं नः सर्वतो वद ॥ असपत्नं पुरस्तान्नः शिवं दक्षिणतस्कृधि । अभयं सततं पश्चाद्भद्रमुत्तरतो गृहे ॥ यौवनानि महयसि जिग्युषामिव

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

दुन्दुभिः। शकुन्तक प्रदक्षिणं शतपत्राभि नो वद ॥ आवदँस्त्वं शकुने भद्रमावद तूष्णीमासीनः सुमतिं चिकिद्धि नः । यदुत्पतन्वदसि कर्करिर्यथा बृहद्वदेम विदथे सुवीराः ॥

ऐन्द्रवायव्ये (वैश्वदेवाः सारस्वताः) द्यावापृथिव्यावन्त्यस्तृचो हविर्धाने वा तस्य तृतीयः पादो बार्हतोऽम्बितमे द्वेऽनुष्टुभौ बृहत्यष्टमी शेषं गायत्रम् ॥

इन्द्रश्च मृळयाति नो न नः पश्चादघं नशत् । भद्रं भवाति नः पुरः ॥ इन्द्र आशाभ्यस्परि सर्वाभ्यो अभयं करत् । जेता शत्रून्विचर्षणिः ॥ विश्वेदेवास आगत शृणुता म इमं हवम् । इदं बर्हिर्निषीदत ॥ तीव्रो वो मधुमाँ अयं शुनहोत्रेषु मत्सरः । एतं पिवत काम्यम् ॥ इन्द्रज्येष्ठा मरुद्गणा देवासः पूषरातयः । विश्वे मम श्रुता हवम् ॥ अम्बितमे नदीतमे देवितमे सरस्वति । अप्रशस्ता इव स्मसि प्रशस्तिमम्ब नस्कृधि ॥ त्वे विश्वा सरस्वति श्रितायूँषि देव्याम् । शुनहोत्रेषु मत्स्व प्रजां देवि दिदिड्ढि नः ॥

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

इमा ब्रह्म सरस्वति जुषस्व वाजिनीवति । या ते मन्म गृत्समदा ऋतावरि प्रिया देवेषु जुह्वति ॥ प्रेतां यज्ञस्य शम्भुवा युवामिदा वृणीमहे । अग्निं च हव्यवाहनम् ॥ द्यावा नः पृथिवी इमं सिध्रमद्य दिविस्पृशम् । यज्ञं देवेषु यच्छताम् ॥ आ वामुपस्थमद्रुहा देवाः सीदन्तु यज्ञियाः । इदाद्य सोमपीतये ॥

आ नो दश (गौतमो) वैश्वदेवन्तु द्वि त्रिष्टुबन्तमाद्यास्तृचाः पञ्चमी सप्तमी जगत्यः षष्ठी विराट्स्थाना ॥

आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः । देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवे दिवे ॥ देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभि नो नि वर्तताम् । देवानां सख्यमुप सेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे ॥ तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम् । अर्यमणं वरुणं सोममश्विना सरस्वती नः सुभ-

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

गा मयस्करत् ॥ तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः । तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् ॥ तमीशानं जगतस्तस्थुषस्पतिं धियञ्जिन्वमवसे हूमहे वयम् । पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ पृषदश्वा मरुतः पृश्निमातरः शुभंयावनो विदथेषु जग्मयः । अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसा गमन्निह ॥ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥ शतमिन्नु शरदो अन्तिदेवा यत्रा नश्चक्रा जरसं तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः । विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम् ॥ ❀

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

अग्निर्वायुश्च सूर्यश्च वरुणः साम एवच ।
ब्रह्म राज्ञे रथश्चैवमित्यष्टावग्निभद्रकम् ॥

अग्नये समनमत्पृथिव्यै समनमद्यथाग्निः पृथिव्या समनमदेवं मह्यं भद्राः संनतयः संनमन्तु ॥ वायवे समनमदन्तरिक्षाय समनमद्यथा वायुरन्तरिक्षेण समनमदेवं मह्यं भद्राः संनतयः संनमन्तु ॥ सूर्याय समनमद्दिवे समनमद्यथा सूर्यो दिवा समनमदेवं मह्यं भद्राः संनतयः संनमन्तु ॥ वरुणाय समनमदद्भ्यः समनमद्यथा वरुणोऽद्भिः समनमदेवं मह्यं भद्राः संनतयः संनमन्तु साम्ने समनमदृचे समनमद्यथा सामर्चा समनमदेवं मह्यं भद्राः संनतयः संनमन्तु ॥ ब्रह्मणे समनमत्क्षत्राय समनमद्यथा ब्रह्मक्षत्रेण समनमदेवं मह्यं भद्राः संनतयः संनमन्तु ॥ राज्ञे समनमद्विशे समनमद्यथा राजा विशा समनमदेवं मह्यं भद्राः संनतयः संनमन्तु ॥ रथाय समनमदश्वेभ्यः समनमद्यथा रथोऽश्वैः समनमदेवं मह्यं भद्राः संनतयः संनमन्तु ॥

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

भद्रो नो अग्निः सुहवो विभावसुर्भद्र इन्द्रः पुरुहूतः पुरुष्टुतः।
भद्रः सूर्य उरुचक्षा उरुव्यचा भद्रश्चन्द्रमाः सँमिथेषु जागृविः॥
भद्रः प्रजा अजनयन्नः प्रजापतिर्भद्रः सोमः पवमानो वृषा हरिः
भद्रस्त्वष्टा विदधद्रूपाण्यद्भुतो भद्रो नो धाता वरिवस्यतु प्रजाः॥
भद्रस्तार्क्ष्यः सुप्रजस्त्वाय नो महानरिष्टनेमिः पृतना युधा जयन्।
भद्रो वायुर्मातरिश्वा नियुत्पतिर्वेनो गयस्फान उशन्त्सदास्तु नः॥
भद्रो मित्रो वरुणो रुद्र इद्वृधा भद्रोऽहिर्बुध्न्यो भुवनस्य रक्षिता।
भद्रो नो वास्तोष्पतिरस्त्वमीवहा भद्रः क्षेत्रस्य पतिर्विचर्षणिः॥
भद्रो विभुर्विश्वकर्मा बृहस्पतिर्भद्रो द्विषस्तपनो ब्रह्मणस्पतिः। भद्रः
सुपर्णो अरुणो मरुत्सखा भद्रो नो वातो अभिवातु भेषजी॥ भद्रो
दधिक्रा वृषभः कनिक्रदद्भद्रः पर्जन्यो बहुधा विराजति। भद्रः
सरस्वाँ उत नः सरस्वती भद्रोर्वशी भद्र इन्द्रः पुरूरवाः॥ भद्रो
नः पूषा सविता यमो भगो भद्रोऽजएकपादर्यमा मनुः। भद्रो विष्णुः
रुरुगायो वृषा हरिर्भद्रो विवस्वाँअभिवातु नस्त्मना॥ भद्रा गायत्री

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

ककुबुष्णिहा विराड्भद्रानुष्टुब्बृहती पङ्क्तिरस्तु नः। भद्रा नस्त्रिष्टुब्जगती पुरुप्रिया भद्रातिच्छन्दा बहुधा विभूवरी ॥ भद्रा नो राकानुमतिः कुहूः सुहृद्भद्रा सिनीवाल्यदितिर्मही धुवा। भद्रा नो द्यौरन्तरिक्षं मयस्करं भद्रोशोदक्षस्तनयाय नस्तुजे ॥ भद्रो नः प्राणः सुमनाः सुवागसद्भद्रो अपानः सतनोस्सहात्मना। भद्रं चक्षुर्भद्रमिच्छोत्रमस्तु नो भद्रन्न आयुश्शरदो असच्छताम् ॥ भद्रेन्द्राग्नी नो भवतामृतावृधा भद्रा नो मित्रावरुणा धृतव्रता। भद्राश्विना नो भवतां नवेदसा भद्रा द्यावापृथिवी विश्वशम्भुवा॥ भद्रा न इन्द्रावरुणारिषादसा भद्रा न इन्द्रा भवतां बृहस्पती। भद्रेन्द्राविष्णू सवनेष्वयावृधा भद्रेन्द्रासोमायुधि दस्युहन्तमा ॥ भद्राग्नाविष्णू विदथस्य प्रसाधना भद्रा नोऽग्नीन्द्रा वृषभा दिवस्पती। भद्रा नो अग्नीवरुणा प्रचेतसा भद्राग्नीषोमा भवता नवेदसा॥ भद्रा सूर्याचन्द्रमसा कविक्रतू भद्रा सोमा भवतां पूषणा नः। भद्रेन्द्रावायू पृतनास्वसासही भद्रा सूर्याग्नी अदितिर्वनस्पती ॥ भद्रा नः सन्तु समदो नमु-

CC-0. Late Pt. Manoranjan Shashi Collection Jammu. Digitized by eGangotri

प्रजा भद्रा रुद्रावृत्रहणा पुरन्धरा । भद्रा आदित्याः स्वपसः सुनीतयो भद्रा राजानो मरुतो विरप्शिनः ॥ भद्रा न ऊमाः सुहवाः शतश्रियो विश्वेदेवा मनवश्चर्षणीधृतः । भद्राः साध्या अभिभवः सूरचक्षसो भद्रा नः सन्त्वृभवो रत्नधातमा ॥ भद्राः सर्वे वाजिनो वाजसातयो भद्रा ऋषयः पितरो गभस्तयः । भद्रा भृगवोऽङ्गिरसः सुदानवो भद्रा गन्धर्वाप्सरसः सुदंससः ॥ भद्रा आपः शुचयो विश्वभृत्तमा भद्राः शिवा यक्ष्मनुदो न ओषधीः । भद्रा गावः सुरभयो वयोवृधो भद्रा योषा उशतीर्देवपत्नयः ॥ भद्राणि सामानि सदा भवन्तु नो भद्रा अथर्वाण ऋचो यजूंषि नः । भद्रा नक्षत्राणि शिवानि विश्वा भद्रा आशा अहृताः सन्तु नो हृदि ॥ संवत्सरा न ऋतवो मयोभुवो युवा आयुवाः सुसराण्युत क्षपाः । मुहूर्ताः काष्टाः प्रदिशो दिशश्च सदा भद्राः सन्तु द्विपदे चतुष्पदे ॥ भद्रं पश्येम प्रचरेम भद्रं भद्रं वदेम शृणुयाम भद्रं । तन्नो मित्रो वरुणो मा महन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

आग्नेय्यौ द्वे देवीनामेकेन्द्राणीवरुणान्यग्नायीनां द्यावापृथिव्यौ पार्थिवी षड्वैष्णव्योऽतो देवा दैवी वा गायत्री ॥

अभि नो देवीरवसा महः शर्मणा नृपत्नीः । अच्छिन्नपत्राः सचन्ताम् ॥ इहेन्द्राणीमुप ह्वये वरुणानीं स्वस्तये । अग्नायीं सोमपीतये ॥ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिः ॥ तयोरिद्घृतवत्पयो विप्रा रिहन्ति धीतिभिः । गन्धर्वस्य ध्रुवे पदे ॥ स्योना पृथिवी भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथः ॥ अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे । पृथिव्याः सप्तधामभिः ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे ॥ त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः । अतो धर्माणि धारयन् ॥ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पृशे । इन्द्रस्य युज्यः सखा ॥ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥ तद्विप्रासो विपण्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदम् ॥

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

गायत्र्यै नमः ॐभूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ३ । अश्वमेधे घोराणामार्षम् ॥

द्रष्ट्रे नम उप द्रष्ट्रे नमोऽनुद्रष्ट्रे नमः ख्यात्रे नम उपख्यात्रे नमोऽनुख्यात्रे नमः श्रृण्वते नम उपश्रृण्वते नमः सते नमोऽसते नमो जाताय नमो जनिष्यमाणाय नमो भूताय नमो भविष्यते नमश्चक्षुषे नमः श्रोत्राय नमो मनसे नमो वाचे नमो ब्रह्मणे नमः श्रान्ताय नमस्तपसे नमः ॥ भूतं भव्यं भविष्यद्वषट्स्वाहा नम ऋक्साम यजुर्वषट्स्वाहा नमो गायत्री त्रिष्टुब्जगती वषट्स्वाहा नमः पृथिव्यन्तरिक्षं द्यौर्वषट्स्वाहा नमोऽन्नं कृषिर्वृष्टिर्वषट्स्वाहा नमः पिता पुत्रः पौत्रो वषट्स्वाहा नमः प्राणो व्यानोऽपानो वषट्स्वाहा नमो भूर्भुवः स्वर्वषट् स्वाहा नमः ॥

यो विश्वचक्षुरुत विश्वतो मुखो विश्वतो हस्त उत विश्वतस्पात् । सम्बाहुभ्यां नमते संय्यजत्रैर्द्यावापृथिवी जनयन्देव एकः ॥ आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामस्मिन्राष्ट्रे राजन्य

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

इषव्यः शूरो महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः स-प्तिर्जिष्णू रथेष्ठाः पुरन्धिर्योषा सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥ इषे त्वोर्जेति ब्रह्मणः (सर्ववेदो ब्रह्मणः) ॥ इषे त्वोर्जे त्वा वायवः स्थोपायवः स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे ॥ आप्यायध्वमघ्न्या देवभागं प्रजावतीरनमीवा अयक्ष्माः ॥ मा वस्तेन ईशत माघशँसः परि वो रुद्रस्य हेतिर्वृणक्तु ॥ ध्रुवा अस्मिन्गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि यजमानस्य पशुपा असि ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे घोषदसि प्रत्युष्टं रक्षः प्रत्युष्टारातिः प्रेयमगाद्विषणा बर्हिरच्छ मनुना कृता स्वधया वितष्टा ॥ उर्वन्तरिक्षं वीहीन्द्रस्य परिधूतमसि माधो मोपरि परुस्त श्रद्धया स मा च्छेत्ता ते मा रिषत् ॥ देवबर्हिः शतवल्शं विरोह सहस्रवल्शा वि वयं रुहेम ॥ अदित्या त्वासी-

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

न्द्राण्याः सन्नहनं पूषा ते ग्रन्थिं ग्रथ्नातु स ते मा स्थादिन्द्रस्य त्वा बाहुभ्यामुद्यच्छे बृहस्पतेस्त्वा मूर्ध्ना हरामि देवङ्गममसि ॥ तदाहरन्ति कवयः पुरस्ताद्देवेभ्यो जुष्टमिह बर्हिरासदे। वसोः पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारम् ॥ अयक्ष्मा वः प्रजया संसृजामि रायस्पोषेण बहुला भवन्तीः । मधुमद्घृतवत्पिन्वमाना जीवा जीवन्तीरुप वः सदेम ॥ मातरिश्वनो घर्मोऽसि द्यौरसि पृथिव्यसि विश्वधायाः परेण धाम्ना हुतासि मा ह्वाः सा विश्वायुः सा विश्वव्यचाः सा विश्वधाया हुतस्तोको हुतो द्रप्सोऽग्नये बृहते नाकाय स्वाहा द्यावापृथिवीभ्याम् ॥ सम्पृच्यध्वमृतावरीरूर्मिणीर्मधुमत्तमा मन्द्रा धनस्य सातयः ॥ इन्द्रस्य त्वा भागं सोमेनातनच्म्यदस्तमसि विष्णवे विष्णो हव्यँ रक्षस्वापो जागृत ॥

महि त्रीणामवोऽस्तु द्युक्षं मित्रस्यार्यम्णः । दुराधर्षं वरुणस्य ॥ नहि तेषामप्रमा चन नाध्वसु वारणेषु । ईशे रिपुरघशँसः यस्मै पुत्रासो अदितेः प्रजीवसे मर्त्याय ज्योतिर्यच्छन्त्यजस्रम् ॥ सोमानं

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्तं य औशिजः ॥ यो रेवान्यो अमीवहा वसुवित्पुष्टिवर्धनः । स नः सिषक्तु यस्तुरः ॥ मा नः शँसो अररुषो धूर्तिः प्रणङ्मर्त्यस्य । रक्षा णो ब्रह्मणस्पते ॥

सं वः सृजामि हृदयं संसृष्टं मनो अस्तु वः । सं सृष्टास्तन्वः सन्तु वः सं सृष्टः प्राणो अस्तु वः ॥ सं यावः प्रियास्तन्वः सं प्रिया हृदयानि वः । आत्मा वो अस्तु सं प्रियः सं प्रियास्तन्वो मम ॥ अग्नेरायुरसि तस्य ते मनुष्या आयुष्कृतस्तेनासा अमुष्मा आयुर्धेहि ॥ इन्द्रस्य प्राणः स ते प्राणं ददातु यस्य प्राणस्तस्मै ते स्वाहा ॥ पितॄणां प्राणस्ते ते प्राणं ददतु येषां प्राणस्तेभ्यो वः स्वाहा ॥ मरुतां प्राणस्ते ते प्राणं ददतु येषां प्राणस्तेभ्यो वः स्वाहा ॥ विश्वेषां देवानां प्राणस्ते ते प्राणन्ददतु येषां प्राणस्तेभ्यो वः स्वाहा ॥ प्रजापतेः परमेष्ठिनः प्राणः स ते प्राणन्ददातु ययोः प्राणस्ताभ्यां वां स्वाहा ॥ यदसर्पस्तत्सर्पिरभवो यन्नवमैस्तन्नवनीतमभवो यदघ्रियथास्तद्घृतमभवः । घृतस्य

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

धारामसृतस्य पन्थामिन्द्रेण दत्तं प्रयतं मरुद्भिः । तत्त्वा विष्णुरन्वपश्यत्तत्त्वेळा गव्यैरयत् ॥ पावमानेन त्वा स्तोमेन गायत्र्या वर्तन्योपाँशोर्वीर्येणोद्धराम्यसौ ॥ बृहता त्वा रथन्तरेण त्रिष्टुभा वर्तन्या शुक्रस्य वीर्येणोत्सृजाम्यसौ ॥ अग्नेस्त्वा मात्रया जगत्या वर्तन्या देवस्त्वा सवितोन्नयतु जीवातवे जीवनस्याया असौ । देवा आयुष्मन्तस्तेऽमृतेनायुष्मन्तस्तेषामयमयुषायुष्मानस्त्वसौ ॥ ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मत्तस्यायमायुषायुष्मानस्त्वसौ ॥ अग्निरायुष्मान्स वनस्पतिभिरायुष्माँस्तस्यायमायुषायुष्मानस्त्वसौ ॥ यज्ञ आयुष्मान्स दक्षिणाभिरायुष्माँस्तस्यायमायुषायुष्मानस्त्वसौ सोम आयुष्मान्स ओषधीभिरायुष्माँस्तस्यायमायुषायुष्मानस्त्वसौ ओषधय आयुष्मतीस्ता अद्भिरायुष्मतीस्तासामयमायुषायुष्मानस्त्वसौ ॥ इमममग्न आयुषे वर्चसे कृधि तिग्मभोजो वरुण स्वं शिशाधि । मातेवास्मा अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथा सत् ॥ अश्विनोः प्राणस्तौ ते प्राणं दत्तां तेन जीव मित्रावरुणयोः

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

प्राणस्तौ ते प्राणं दत्तां तेन जीव बृहस्पतेः प्राणः स ते प्राणं ददातु तेन जीव ॥ ये देवाः पुरः सदोऽग्निनेत्रा रक्षोहणस्ते नः पान्तु ते नोऽवन्तु तेभ्यः स्वाहा ॥ ये देवा दक्षिणात्सदो यमनेत्रा रक्षोहणस्ते नः पान्तु ते नोऽवन्तु तेभ्यः स्वाहा ॥ ये देवाः पश्चात्सदो मरुन्नेत्रा रक्षोहणस्ते नः पान्तु ते नोऽवन्तु तेभ्यः स्वाहा ॥ ये देवा उत्तरात्सदो मित्रावरुणनेत्रा रक्षोहणस्ते नः पान्तु नोऽवन्तु तेभ्यः स्वाहा ॥ ये देवा उपरिषदः सोमनेत्रा अवस्वदन्तो रक्षोहणस्ते नः पान्तु ते नोऽवन्तु तेभ्यः स्वाहा ॥ इदमहं रक्षोभिः समूहाम्यग्ने सन्दह रक्षः सन्दग्धं रक्षोऽग्नये पुरः सदे रक्षोघ्ने स्वाहा ॥ यमाय दक्षिणात्सदे रक्षोघ्ने स्वाहा ॥ मरुद्भ्यः पश्चात्सद्भ्यो रक्षोहभ्यः स्वाहा ॥ मित्रावरुणाभ्यामुत्तरात्सद्भ्यां रक्षोहभ्यां स्वाहा ॥ सोमायोपरिषदेऽवस्वदते रक्षोघ्ने स्वाहा ॥ रथः पञ्चवाही दक्षिणा ॥ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥ तस्मा अरं

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः॥ आप्या-
यस्व समेतु ते विश्वतः सोम वृष्ण्यम्। भवा वाजस्य सङ्गथे॥
पुष्पवतीः प्रसुमतीः फलिनीरफला उत। अश्वा इव सजित्वरीर्वीरु-
धः पारयिष्णवः॥ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्व-
रीं सर्वभूतानां तामिहोपह्वये श्रियम्॥ कर्मणे वां वानस्पत्यमसि
प्रत्युष्टं रक्षः प्रत्युष्टारातिः। उर्वन्तरिक्षं वीहि॥ धूरसि धूर्व धूर्वन्तं
योऽस्मान्धूर्वति तं धूर्व यं वयं धूर्वामस्तं च धूर्व। देवानामसि वह्नि-
तमँ सस्नितमं पप्रितमं जुष्टतमं देवहूतमम्॥ विष्णोः क्रमोऽसि
अहुतमसि हविर्धानं दृँहस्व मा ह्वार्मित्रस्य त्वा चक्षुषा प्रेक्ष उरु
त्वा वाताय॥ वसवस्त्वा धूपयन्तु गायत्रेण च्छन्दसाङ्गिरस्वत
रुद्रास्त्वा धूपयन्तु त्रैष्टुभेन च्छन्दसाङ्गिरस्वत् आदित्यास्त्वा धूप-
यन्तु जागतेन च्छन्दसाङ्गिरस्वत् विश्वे त्वा देवा वैश्वानरा धूप-
यन्त्वानुष्टुभेन च्छन्दसाङ्गिरस्वत्॥ इन्द्रस्त्वा धूपयतु वरुणस्त्वा
धूपयतु। विष्णुस्त्वा धूपयतु॥ उद्वयं तमसस्परि ज्योतिष्पश्यन्त

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

उत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ तेजोऽसि शुक्रमसि ज्योतिरसि धामासि प्रियं देवानामनाधृष्टं देवयजनं देवताभ्यस्त्वा देवताभ्यो गृह्णामि ॥ अध्वर्योऽयं यज्ञो अस्तु देवा ओषधीभ्यः पशुभ्यो मे धनाय । विश्वस्मै भूताय ध्रुवो अस्तु देवाः स पिन्वस्व घृतवद्देव यज्ञ ॥ इहैवैधि माप च्योष्ठाः पर्वत इवाविचाचलिः । इन्द्र इवेह ध्रुवस्तिष्ठेह यज्ञमु धारय ॥ इममिन्द्रो अदीधरद् ध्रुवं ध्रुवेण हविषा हविः । तस्मै सोमो अधि ब्रुवत्तस्मा उ ब्रह्मणस्पतिः ॥ ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे । ध्रुवँ विश्वमिदं जगद्ध्रुवो राजा विशामसि ॥ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतान्नो भरीमभिः ॥ भळित्था पर्वतानां खिद्रं बिभर्षि पृथिवि प्र या भूमि प्रवत्वति महा जिनोषि महिनि ॥

नि षु सीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनाम् । न ऋते त्वत्क्रियते किञ्चनारे महामर्कं मघवञ्चित्रमर्च ॥ कुमारं माता युवतिः समुब्धं गुहा बिभर्ति न ददाति पित्रे । अनीकमस्य न मिन-

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

ज्ञनासः पुरः पश्यन्ति निहितमरुतौ ॥ अश्वपूर्वाँ रथमध्यां हस्तिनादप्रमोदिनीम् । श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥ कांस्योस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् । पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥ इयं शुष्मेभिर्बिसखा इवारुजत्सानु गिरीणां तविषेभिरूर्मिभिः । पारावतघ्नीमवसे सुवृक्तिभिः सरस्वतीमा विवासेम धीतिभिः ॥ विश्वकर्मा विश्वदेवो विश्वजिद्विश्वदर्शतः । ते त्वा घृतस्य धारया श्रैष्ठ्याय समसूषत ॥ ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् । श्येनो गृध्राणाँ स्वधितिर्वनानाँ सोमः पवित्रमत्येति रेभन् ॥ प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥ यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो वनस्पतिषु । यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु देवाः ॥ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥ इषे त्वोर्जे त्वा वायवः स्थोपायवः

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे ॥ अग्न आ याहि वीतये गृणानो हव्यदातये। नि होता सत्सि बर्हिषि ॥ शं नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभि स्रवन्तु नः ॥ आहं पितॄन् सु विदत्राँ अवित्सि नपातं च विक्रमणं च विष्णोः। बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठाः ॥ वषट्ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् । वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥ तद्विष्णोः परमं पदं० ॥ वासुदेवाय नमः ८ ॥ यो रुद्रो अग्नौ० भवाय देवाय नमः ८ ॥ गणानां त्वा गणपतिं० ॥ विनायकाय नमः ८ ॥ चित्रं देवानां० ॥ ह्रां ह्रीं सः सूर्याय नमः ८ ॥ जातवेदसे० ॥ अमायै नमः ८ ॥ यत इन्द्र भयामहे० ॥ अभयङ्करी देव्यै नमः ॥ इह राष्ट्राधिपतये अमुक भैरवाय नमः ॥ इन्द्रापर्वता बृहता रथेन वामीरिष आ वहतं सुवीराः। वीतं हव्यान्यध्वरेषु देवा वर्धेथां गीर्भिरिळया मदन्ता ॥ अग्निः सप्ति

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

वाजम्भरं ददात्यग्निर्वीरं श्रुत्यं कर्मनिष्ठम् । अग्नी रोदसी वि चरत्स-मञ्जन्नग्निर्नारीं वीरकुक्षिं पुरन्धिम् ॥ यमो दाधार पृथिवीं द्यमो द्यामुत सूर्यम् । यमाय सर्वमित्तस्थे यत्प्राणद्वायुरक्षितम् ॥ यं ते देवी निर्ऋतिराबबन्ध पाशं ग्रीवास्वविचर्त्यम् । तं ते विष्याम्यायु-षो नु मध्येऽधा विषितः पितुमद्धि प्रमुक्तः ॥ उदुत्तमं वरुण पाश-मस्मदवाधमं वि मध्यमं श्रथाय । अथा वयमादित्य व्रते तवानाग-सो अदितये स्याम ॥ वायवायाहि दर्शतेमे सोमा अरंकृताः । तेषां पाहि श्रुधी हवम् ॥ सोमो धेनुं सोमो अर्वन्तमाशुं सोमो वीरं कर्मण्यं ददाति । सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददा-श तस्मै ॥ राजाधिराजाय प्रसह्य साधने नमो वयं वैश्रवणाय कुर्महे स मे कामान्कामकामाय मह्यं कामेश्वरो वैश्रवणो ददातु । कुवेराय वैश्रवणाय महाराजाय वै नमो नमः ॥ ईशानं त्वा शुश्रु-मा वयं धनानां धनपते गोमदग्ने अश्ववद्भूरिपुष्टं हिरण्यवदन्नव-द्धेहि मह्यम् ॥ दुहान्ते द्यौः पृथिवी पयो जगरस्त्वा सोदको विस-

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

र्पतु । प्रजापतिनात्मानमाप्रीणेऽरिक्तो म आत्मा ॥ यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो वनस्पतिषु । यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु देवाः ॥ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः । स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥ वषट्ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् । वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥ नमो अस्तु सर्पेभ्यो ये के च पृथिव्यामधि । ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥ येषु वा यातुधाना ये वा वनस्पतीरनु । येऽवटेषु शेरते तेभ्यः सर्पेभ्यो नमः ॥ ये वादो रोचने दिवो ये वा सूर्यस्य रश्मिषु । येऽप्सु सदांसि चक्रिरे तेभ्यः सर्पेभ्यो नमः ॥ धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम । धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम ॥ अग्निस्तुविश्रवस्तमं तुविब्रह्माणमुत्तमम् । अतूर्तं श्रावयत्पतिं पुत्र ददाति दाशुषे ॥ आ कृष्णेन रजसा वर्तमानो निवेश-

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

यन्नमृतं मर्त्यं च। हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥ एवा वन्दस्व वरुणं बृहन्तं नमस्या धीरमृतस्य गोपाम्। स नः शर्म त्रिवरूथं वि यं सत्पातं नो द्यावापृथिवी उपस्थे॥ या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु। तेभिर्नो विश्वैः सुमना अहेळन्राजन्सोम प्रति हव्या गृभाय॥ तँ युवं देवावश्विना कुमारं साहदेव्यम्। दीर्घायुषं कृणोतन॥ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपाँ रेताँसि जिन्वति॥ वषट्ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम्। वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः॥ बोधा सु मे मघवन्वाचमेमां यां ते वसिष्ठो अर्चति प्रशस्तिम्। इमा ब्रह्म सधमादे जुषस्व॥ त्रातारमिन्द्रमवितारमिन्द्रँ हवे हवे सुहवँ शूरमिन्द्रम्। ह्वयामि शक्रं पुरुहूतमिन्द्रँ स्वस्ति नो मघवा धात्विन्द्रः॥ बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु। यद्दीदयच्छवसर्तप्रजात तदस्मासु द्रविणं धेहि चित्रम्॥ सरस्वतीं देवयन्तो

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

हवन्ते सरस्वतीमध्वरे तायमाने । सरस्वतीं सुकृतो अह्वयन्ते सरस्वती दाशुषे वार्यं दात् ॥ अन्नात्परिस्रुतो रसँ ब्रह्मणा व्यपिबत्क्षत्रम् । ऋतेन सत्यमिन्द्रियं विपानँ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥ प्रजापते न हि त्वदन्य एता विश्वा जातानि परि ता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ॥ शं नो देवीरभिष्टय आपो भवन्तु पीतये । शँ योरभि स्रवन्तु नः ॥ गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम् ॥ कया नश्चित्र आ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥ आ वो राजानमध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः । अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वम् ॥ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भिरजायथाः ॥ को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून् । आसन्निषून्हृत्स्वसो मयो भून्य एषां भृत्यामृणधत्स जीवात् ॥ ध्रुवा

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे । ध्रुवं विश्वमिदं जगद्ध्रुवो राजा विशामयम् ॥ आदित्यं गर्भं पयसा समञ्जन्सहस्रस्य प्रतिमाँ विश्वरूपम् । परिवृङ्धि हरसा माभिमंस्थाः शतायुषं कृणुहि चीयमानः ॥ अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं बलमिच्छमानः । उभौ वर्णावृषिरुग्रः पुपोष सत्या देवेष्वाशिषो जगाम ॥ अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन् । सखा सुशेव एधि नः ॥ वास्तोष्पते प्रति जानीह्यस्मान्त्स्वावेशो अनमीवो भवा नः । यत्त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे ॥ वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो । अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति नो जुषस्व ॥ वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या । पाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः ॥ राकामहं सुहवां सुष्टुतीं हुवे शृणोतु नः सुभगा बोधतु त्मना । सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरं शतदायमुक्थ्यम् ॥ यास्ते राके सु मतयः सु-

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

पेशसो याभिर्ददासि दाशुषे वसूनि। ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा ॥ सिनीवालि पृथुष्टुके या देवानामसि स्वसा । जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः ॥ या सुबाहुः स्वंगुरिः सुषूमा बहुसूवरी। तस्यै विश्पत्न्यै हविः सिनीवाल्यै जुहोतन ॥ या गुंगूर्या सिनीवाली या राका या सरस्वती । इन्द्राणीमह्व ऊतये वरुणानीं स्वस्तये ॥ इन्द्राणीमासु नारिषु सुपत्नीमहमश्रवम्। नह्यस्या अपरं चन जरसा मरते पतिर्विश्वस्मादिन्द्र उत्तरः ॥ नाहमिन्द्राणि रारण सख्युर्वृषाकपेर्ऋते । यस्येदमप्यँ हविः प्रियं देवेषु गच्छति विश्वस्मादिन्द्र उत्तरः ॥ कुहूमहँ सुकृतं विद्मनापसमस्मिन्यज्ञे सुहवां जोहवीमि। या नो ददाति श्रवणं पितृणां तस्यै ते देवि हविषा विधेम ॥ कुहूर्देवानाममृतस्य पत्नी हव्या नो अस्य हविषः शृणोतु । स्वसा देवानां महयन्त्यस्मे राय स्पोष चिकितुषे दधातु ॥ धाता ददातु नो रयिमीशानो जगतस्पतिः। स नः पूर्णेन वावनत् ॥ प्रजापतीरमषतु प्रजा इह धाता द-

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

धातु सुमनस्यमानः । संवत्सर ऋतुभिश्चाकल्पानो मयि पुष्टि पुष्टि-पतिर्दधातु ॥ देवासुराणामार्षम् ॥ तव श्रिये व्यजिहीत पर्वतो गवां गोत्रमुदसृजो यदङ्गिरः । इन्द्रेण युजा तमसा परीवृतं बृहस्पते निरपामौब्जो अर्णवम् ॥ बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवसर्तप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥ बृहस्पतिः समजयद्वसूनि महो व्रजान्गोमतो देव एषः । अपः सिषासन्त्स्वरप्रतीतो बृहस्पतिर्हन्त्यमित्रमर्कैः ॥ यमो दाधार पृथिवीं द्यमो द्यामुत सूर्यम् । यमाय सर्वमित्तस्थे यत्प्राणद्वायुरक्षितम् यथा पञ्च यथा षड्यथा पञ्च दशर्षयः । यमं यो विद्यात्स ब्रूयाद्यथैकर्षिर्वि जानते ॥ त्रिकद्रुकेभिः पतति षडुर्वीरेकमिद्बृहत् । गायत्री त्रिष्टुप्छन्दाँसि सर्वा ता यम आहिता ॥ मृळा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते । यच्छं च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु ॥ अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः । सुम्ना यन्निद्विशो अस्माकमा चरारिष्ट-

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

वीरा जुहवाम ते हविः ॥ त्वेषं वयँ रुद्रं यज्ञसाधनं वङ्कुं कविम-
वसे नि ह्वयामहे । आरे अस्मद्दैव्यं हेळो अस्यतु सुमतिमिद्वयम-
स्या वृणीमहे ॥ अव ते हेळो वरुण नमोभिरव यज्ञेभिरीमहे हवि-
र्भिः । क्षयन्नस्मभ्यमसुर प्रचेता राजन्नेनाँसि शिश्रथः कृतानि ॥
उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथय । अथा वय-
मादित्य व्रते तवानागसो अदितये स्याम ॥ इमं मे वरुणः श्रुधी
हवमद्या च मृळय । त्वामवस्युराचके ॥ तत्त्वा यामि ब्रह्मणा वन्दमा-
नस्तदाशास्ते यजमानो हविर्भिः । अहेळमानो वरुणेह बोध्युरु-
शंस मा न आयुः प्र मोषीः ॥ महाव्याहृतयः प्रजापतेः ॥
ॐ भूर्लोकाय नमः । ॐ भुवोलोकाय नमः । ॐ स्वर्लोकाय नमः ।
ॐ भूर्भुवः स्वर्लोकाय नमः । अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या
अयम् । अपां रेताँसि जिन्वति ॥ उभा वामिन्द्राग्नी आहुवध्या
उभा राधसः सह मादयध्यै । उभा दातारा विषां रयीणामुभा
वाजस्य सातये हुवे वाम् ॥ अयमिह प्रथमो धायि धातृभिर्होता

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

यजिष्ठो अध्वरेष्वीड्यः । यमग्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशे विशे ॥ अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः । तं जानन्नग्न आरोह ततो नो वर्धया रयिम् ॥ स्तोमांदेवानाम् ॥ उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये । आरे अस्मे च शृण्वते ॥ अस्य प्रत्नामनु द्युतं शुक्रं दुदुह्रे अह्रयः । पयः सहस्रसामृषिम् ॥ आरुणेः । कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे । उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यते ॥ परि ते दूळभो रथोऽस्माँ अश्नोतु विश्वतः । येन रक्षसि दाशुषः ॥ रक्षोहणं वाजिनमा जिघर्मि मित्रं प्रथिष्टमुप यामि शर्म । शिशानो अग्निः क्रतुभिः समिद्धः स नो दिवा सरिषः पातु नक्तम् ॥ प्रत्यग्ने हरसा हरः शृणीहि विश्वतः प्रति । यातुधानस्य रक्षसो बलं वि रुज वीर्यम् ॥ यत इन्द्र भयामहे ततो नो अभयं कृधि । मघवञ्छग्धि तव तं न ऊतिभिर्विद्विषो विमृधो जहि ॥ ये देवा दिव्येकादश स्थ पृथिव्यामध्येकादश । अप्सुषदो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ॥

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

क्षेत्रस्य पतिना वयं हितेनेव जयामसि । गामश्वं पोषयित्वा स नो मृळातीदृशे ॥ क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व । मधुश्च्युतं घृतमिव सु पूतमृतस्य नः पतयो मृळयन्तु ॥ मधुमतीरोषधीर्द्याव आपो मधुमन्नो भवत्वन्तरिक्षम् । क्षेत्रस्य पतिर्मधुमान्नो अस्त्वरिष्यन्तो अन्वेनं चरेम ॥ भूतो भूतेषु चरति प्रविष्टः स भूतानामधिपतिर्बभूव । तस्य मृत्युश्चरति राजसूयं स राजा राज्यमनुमन्यतामिदम् ॥ उर्वी रोदसी वरिवः कृणोतु क्षेत्रस्य पत्नीरधिवोचतं नः । स्तौमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुञ्चतमंहसः ॥ यो ह वै देवान्साध्यान्वेद सिध्यत्यस्मादेमिमावलोकाः । देवाः साध्याः सिद्धं ह्यस्यै सिद्धमस्मै सिद्धममुष्यै य एवं वेद सिद्ध्यत्यस्मै ॥ यो विश्वचक्षुरुत विश्वतो मुखो विश्वतो हस्त उत विश्वतस्पात् । सम्बाहुभ्यां नमते संपतत्रैर्द्यावापृथिवी जनयन्देव एकः ॥ यस्य व्रतमुप तिष्ठन्त आपो यस्य व्रते पशवो यन्ति सर्वे यस्य व्रते पुष्टिपतिर्निविष्टस्तं सरस्वन्तमवसे जोहवीमि ॥ गौरीर्मिमाय सलिलानि तक्षत्येकपदी

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

द्विपदी सा चतुष्पदी । अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ॥ दिव्यं सुपर्णं वायसं बृहन्तमपां गर्भं दर्शतमोषधीनाम् । अभीपतो वृष्टिभिस्तर्पयन्तं सरस्वन्तमवसे जोहवीमि ॥ सरस्वतीं देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने । सरस्वतीं सुकृतो अह्वयन्त सरस्वती दाशुषे वार्यं दात् ॥ सरस्वत्यभि नो नेषि वस्यो माप स्फरीः पयसा मा न आ धक् । जुषस्व नः सख्या वेश्या च मा त्वत्क्षेत्राण्यरणानि गन्म ॥ पावका नः सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धियावसुः ॥ चोदयित्री सूनृतानां चेतन्ती सुमतीनाम् । यज्ञं दधे सरस्वती ॥ महो अर्णः सरस्वती प्र चेतयति केतुना । धियो विश्वा वि राजति ॥ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥ जातवेदसे सुनवाम सोममरातीयतो नि दहाति वेदः । स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥ ये के च ज्मा महिनो अहिमाया दिवो जज्ञिरे अपां सधस्थे । ते अस्मभ्यमिषये विश्वमायुः क्षप उस्रा वरिवस्यन्तु देवाः ॥

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

मुञ्चामि त्वा हविषा जीवनाय कमज्ञातयक्ष्मादुत राजयक्ष्मात् । ग्राहिर्जग्राह यदि वैतदेनं तस्या इन्द्राग्नी प्र मुमुक्तमेनम् ॥ स सुष्टुभा स ऋक्वता गणेन बलँ रुरोज फलिगँ रवेण । बृहस्पतिरुस्रिया हव्यसूदः कनिक्रदद्वावशतीरुदाजत् ॥ एवा पित्रे विश्वदेवाय वृष्णे यज्ञैर्विधेम नमसा हविर्भिः । बृहस्पते सुप्रजा वीरवन्तो वयं स्याम पतयो रयीणाम् ॥ यौ ते श्वानौ यम रक्षितारौ चतुरक्षौ पथिरक्षी नृचक्षसौ । ताभ्यामेनं परि देहि राजन्त्स्वस्ति चास्मा अनमीवञ्च धेहि ॥ यत्र वेत्थ वनस्पते देवानां गुह्या नामानि । तत्र हव्यानि गामय ॥ अन्विदनुमते त्वं मन्यासै शं च नस्कृधि । इषं तोकाय नो दधः प्र ण आयूँषि तारिषः ॥ यत्ते नाम सुहवं सु प्रणीतेऽनुमतेऽनुमतं सदा नु । तेन त्वं सुमतिं दिव्यं मे इषं पिन्वं विश्ववारं सुवीराम् ॥ अङ्गाद-ङ्गाल्लोम्नो लोम्नो जातं पर्वणि पर्वणि । यक्ष्मं सर्वस्मादात्मनस्तमिदं वि बृहामि ते ॥ ॐ भूर्भुवः स्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

दिवीव चक्षुराततम् ॥ तद्विप्रासो विपण्यवो जागृवांसः समिन्धते। विष्णोर्यत्परमं पदम् ॥ ऐन्द्राग्नं वर्म बहुलं यदुग्रं विश्वे देवा नाति विध्यन्ति शूराः ॥ तन्नस्त्रायतां तन्वः सर्वतो महदायुष्मन्तो जरामुपगच्छेम जीवाः ॥ अमृतेशमुद्रयाऽमृतीकृत्य अमृतमस्तु अमृतायतां नैवेद्यम् । सावित्राणि सावित्रस्य देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे ॥ महागणपतये इत्यादि० हेरुकादिभ्यो वटुकादिभ्यः (तण्डुलदधिमधुमाम्रामधुपर्कं) नैवेद्यं निवेदयामि नमः ॥ हिरण्यगर्भः० यः प्राणतो० य ओजोदा० येन द्यौरुग्रा० य इमे द्यावा० यस्येमे विश्वे० आपो ह० आ नः प्रजां० ॥ अर्चन्तस्त्वा हवामहेऽर्चन्तः समिधीमहि । अग्नेअर्चन्त ऊतये ॥ अर्चत प्रार्चत प्रियमेधासो अर्चत । अर्चन्तु पुत्रकामा उत पुरं न धृष्ण्वर्चत ॥ इति कलशपूजोपयोगि ऋचकं समाप्तम् ॥

अत्र संस्कर्ता गणेशघाट्टवास्तव्यः कल्ल्येत्युपाह्वः

पण्डित नाथराम शास्त्री

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri